अथर्वप्रातिशाख्यम्

अथातो न्यायाध्ययनस्य पार्षदं वर्तयिष्यामः १ पदानां संहितां विद्यात् २ पदविधिरिति ३ द्विरुदात्तं बृहस्पत्यादीनाम् ४ प्रत्यञ्चां द्वे उपोत्तमे ५ अवर्णमध्य आकार एकादेशे विशेषः ६ अवर्णान्ताच्च ७ इकारादौ च ८ एकारादौ च ९ कृदन्ते द्व्युपसर्गे १० गतिपूर्वो यदा धातुः ११ उपसर्गपूर्वमाख्यातम् १२ वचने वचने पूर्वम् १३ एकेन द्वे १४ द्विनतिकानि वा १५ परकारणानि १६ परयोगीनि १७ अर्थपादादिषूदात्तमाख्यातमामन्त्रितं पदम् १८ व्याघ्रादीन्यनुदात्तानि पादादीनामपोदितम् १९ वाक्यविपर्यये पदलोपेषु पादादिवत्स्वरः २० चयोगादनिघातः २१ वायोगादनिघातः २२ आमन्त्रितादाद्युदात्तात् २३ लुप्तकरणान्यकरणानि वा २४ अन्ययोगादनिघातः २५ नहीत्यनेन युक्तानि २६ यदित्येनेन समस्तेन २७ वचनात्परेण च सर्वत्र युक्तं वापवादो वा लुप्तं वा तत्पदं येन योगः २८

इति प्रथमः पादः

द्विषो बहुवचनम् २९ आमन्त्रितं दैवं दैवीरिति सर्वत्र ३० अर्धस्यासमविभागे ३१ नपुंसकम् तस्येदमिति वा जातिरन्तोदात्तम् ३२ द्वितीयोदात्तानि ३३ अकारात्प्रतिषेधात्परमुदात्तमजरादीनामिति ३४ अकारान्तो ब्रह्मा ब्रह्मण इत्यस्मिन्नर्थे ३५ नपुंसकमाद्युदात्तं ब्रह्म ३६ अन्तोदात्तानि ३७ काव्येति संज्ञायामग्रन्थे ३८ दक्षिणा तद्धितान्तम् ३९

आशामाशिषि ४० अर्वाचीनमिति प्रत्ययान्तरं वा ४१ महो देवस्य महतो देवस्येति ४२ तवर्णलोपोऽन्तोदात्तत्वं च ४३

इति द्वितीयः पादः

पूर्वपदप्रकृतिस्वरस्तस्यापवादः ४४ अनुदात्तानि ४५ आ-ख्यातानि नामसदृशानि ४६ कमिति निपातः ४७ यथेति निपातः ४८ आख्यातान्युपसर्गसदृशानि ४९ आमन्त्रितानि स्वरविशिष्टानि ५० पादादीनामपवादः ५१ आदिस्व-रितानि ५२ एकाक्षराणि स्वरितानि ५३ अनुदात्तानि स्वरि-तानि ५४ द्वियकारारण्युत्तमे ५५ सर्वलिङ्गवचनेष्वसमासे तन्वोपस्पृशतेति ५६ चत्वारि द्वैप्रश्च पञ्चपद्यामन्तोदात्तादीनि यादुकारस्य सर्वत्र ५७

इति तृतीयः पादः

आथर्वणे प्रातिशाख्यमूलसूत्रे

प्रथमः प्रपाठकः समाप्तः

द्वितीयः प्रपाठकः

कन्यला १ एकारो विभक्त्यादेशश्छन्दसि २ सचतिरन्यत्र ३ आकमिति मकारलोपः ४ शकल्येष्यादिषु पररूपम् ५ ईकारोकारौ च सप्तम्यर्थे ६ पूर्वमित्यस्मिन्नर्थे सयकारम् ७ यकारलोपः पत्ययान्तरं वा ८ अपवादो वा ९ वृषभ इति देवताख्यानम् १० अस्तेः प्रैषण्या मध्यमस्यैकवचनम् ११ इत्येतेरिहीत्यन्यत्र १२ परस्तात् पुरस्तादन्यानि १३ ऐका-रान्तान्याकाराबाधे १४ यान्याकारोपधानि मकारान्तानि ता-नि स्त्रियैकवचनानि ह्रस्वोपधानि पुंवचनानि १५

इति प्रथमः पादः

ऊष्मान्तानि स्वरान्ताबाधानि १६ लोपसंदेहे १७ तृतीया-संदेहे सान्ताच्च १८ आकारान्ताच्च प्रत्ययलोपिनः १९ आ-ख्यातं गकारान्तादेव २०-१ भूतेऽद्यतन्या मध्यमस्यैक-वचनम् २०-२ एना अनुदात्तम् २१ ऊष्मान्तानि सकारे परतः संयोगादौ च २२ शकारादौ च २३ विश्वा विसर्जनी-यान्ताः २४ स्वरान्तान्यूष्मान्ताबाधानि २५ एना अन्तोदा-त्तम् २६ स्वरान्तानि सकारे परतः संयोगादौ च २७ गोपा मे स्तमभूतं गोपा इति द्विवचने २८ एकवचनद्विवचन-बहुवचनान्यूष्मान्तानि २९ प्रपाकृपादेवगोपेत्यतोऽन्यानि पा इत्यूष्मान्तानि ३० भूरिधाराशतधारामधुधारा इत्येकवचना-नि ३१ स्त्रीबहुवचनान्यूष्मान्तानि ३२ स्तनयन्नेति वृष्ट्या पर्जन्यस्य वृष्ट्याभीपतो वृष्ट्या इति तृतीयान्तानि ३३ ग्रा-ह्यामित्रान्ग्राह्या गृहा ग्राह्यैनं विध्यामीति ३४ एना पृथिव्या पृथिव्योरसा सं त्वादधामि पृथिवीं पृथिव्या दिवा पृथिव्या इति ३५ ता वो नामानि सिन्धवस्त्वं ता विश्वा यस्ता वि-जानादा घा ता गच्छान्त्सर्वा ता यम आर्पिता इति नपुंसकब हुवचनानि ३६

इति द्वितीयः पादः

प्रो दीर्घः ३७ भूतेऽङ्गस्यादितः ३८ छन्दसि ३९ अदन्तस्य ४० एष स व्यञ्जने ४१ एकादेशे तु ४२ आकारात् ४३ कृदन्ते अन्यवर्णान्ताच्च ४४ एना एहा आदयः प्रकृत्या ४५ ते प्रगृह्यमध्ये भूतादिभ्यः पतिरुत्तरपदमाद्युदात्तम् ४६ द्वियकाराणि ४७ द्विजकारे ४८ द्विलकारम् ४९ द्विप-काराणि ५० द्वितकाराणि ५१ द्विनकाराणि ५२ एका-

रान्तानि ५३ नानापदानि ५४ अभ्यासस्य ५५ अकारान्तानि प्रैषण्या मध्यमस्यैकवचनानि ५६ नैगमी तकाराबाधे ५७ स्वरितान्तान्युदात्तसंहितान्युदात्तेनैकादेशे ५८ प्रतिषेधे उदात्तोऽस्मदादेशे ५९ ङकारावग्रहाणि ६० नकारावग्रहे प्रकृतिभावश्च ६१ मकारावग्रहाणि ६२ सु इत्येतेनोपसर्गेण ६३ स्वशब्देन ६४

इति तृतीयः पादः

ददातेः ६५ इति सार्वधातुके ६६ रयिं दा इति भूते ६७ समानाधिकरणे समानार्थे पदव्यवायेऽप्यस्मै शतादीनि चान्तोदात्तानि ६८ लुप्तशेषेणावग्रहः प्रकृत्यादेशश्च ६९ दन्तपादहृदयोदकनासिकासहसमानरात्रिजायादारुमासः पुंसि शेकृच्छ्रमावद्गम्भीरमिति ७० नलोपे च पादस्य ७१ दीर्घायुत्वायादिषु च ७२ पातयतेर्दीर्घोपधस्य ७३ पादयतिरन्यत्र ७४ पद्यतिरन्यत्र ७५ सयकाराणि ७६ तमित्यस्मिन्नर्थे ७७ अञ्चत्यन्तं प्रथमान्तमुत्तमे परतो द्विधा । उत्तमा उत्तमेष्विति ७८ तकारान्ते ७९ नकारान्तानि मकाराबाधे ८० मकारान्तानि ८१ नकारान्तानि ८२

इति चतुर्थः पादः

आथर्वणे प्रातिशाख्यमूलसूत्रे

द्वितीयः प्रपाठकः समाप्तः

अथ तृतीयः प्रपाठकः

रेफप्रकृतिघोषवत्स्वरेषु १ अव्ययानि च २ आमन्त्रित ओकार इतावनार्षे प्रकृत्या ३ अपिपूर्वो दधातिः ४ आम्रेडित-

समासस्य ५ अनाम्रेडितान्याम्रेडितसदृशानि ६ षत्वणत्वोपाचारदीर्घत्वसमापत्तेः ७ कृणोत्विति ८ मतौ ह्रस्वः ९ संहितायां विसर्जनीयस्य १० उत्तममुदात्तम् ११ उत्तरपदे ह्रस्वः १२ आद्यत्तर वृद्धिः १३ यकारादौ बहुलं दीर्घः १४ गविष्टौ गवेषण इति न लोपो वकारस्य १५ शपथेय्यं सहशेय्यायेत्येकारात्परो यकारः १६ पूर्वपरौ ह्रस्वौ १७ अकारेकारावागमौ पूर्वस्य १८ विधेमेत्यन्यत्र १९ अकारान्तान्विति २० एकारान्ताच्च २१ ओकारान्ताच्च २२

इति प्रथमः पादः

उत्पूर्वो हृषिः २३ एकवचनान्यन्यत्र २४ तकारान्तानि २५ ङ्यन्ताद्वा सुर्न लुप्यते कृदन्ताद्वा २६ एकारादीन्येतेर्ह्यस्तन्याम् २७ आख्यातेन विग्रह उपसर्गेण च २८ अव्ययेन च २९ यथाशास्त्रं क्रमः संयोगे ३० रेफमध्ये तकारः ३१ रेफमध्ये सकारः ३२ ख्यातौ ख्ययौ शुश्रुषीति बाधौ शुचेः ३३ यकारान्तः संयोगः ३४ हकारान्तः संयोगः ३५ तमौ ३६ गमौ ३७ कनौ ३८ पनौ ३९ ककारादिः संयोगः ४० रेफादिः संयोगः ४१ कृत्तीर्दूर्शानीतीकारः ४२ यो अश्व्येनेति यकारः ४३ विकारेऽवयवे वा ४४ हैरण्यैरिति णयौ ४५ ताम्रधूम्रा इति मरौ ४६ नद्यो वेशन्त्या इवेत्यकारम् ४७ त्वष्ट्रेव रूपमिति तृतीयान्तम् ४८ अपरुध्म इति धमौ ४९ कल्मलिः कुल्मलमिति लमौ ५० सत्ते द्वितकारम् ५१ आर्द्रहस्ता समङ्त इति रेफङकारादिः संयोगः ५२ तिर्यमिति तिरौ ५३ ऋभ्वाणं मातरिभ्वरीति भवौ ५४ अन्तवच्चा समन्ते प्र यद्धन्दिष्ठो जिह्वां नि तृन्धीति

नकारादिः ५५

इति द्वितीयः पादः

नकारस्य विसर्जनीयः ५६ नकारस्य रेफः ५७ ह्रस्वोपधस्य तवर्गे प्रकृत्या ५८ दीर्घोपधः सप्तधातु विसर्जनीयस्य ५९ यथापरु समासे सकारः कपयोः ६० पञ्चम्याः परौ ६१ विसर्जनीयस्य सकारः ६२ षत्वस्यापवादः ६३ अनुपसर्गात्षकारः ६४ पूर्वपदात् ६५ उपसर्गस्योत्तरपदे दीर्घः ६६ अनिङ्ग्येषूत्तरपदे दीर्घ इङ्ग्येषु च ६७ अभ्यासस्य दीर्घः छन्दसि ६८ अश्वादीनां मतौ ६९ सर्वलिङ्गवचनेषु च ७० प्रथमस्य ७१ द्वितीयस्य ७२ सात्रासाहादीनामुत्तरपदाद्यस्य ७३ नामेत्यस्य ह्रस्वान्तमसमासे ७४ निपाताव्ययानामुत्तरपदाद्यस्य ७५

इति तृतीयः पादः

अञ्चतौ लुप्तप्रत्यये नेङ्ग्यते ७६ देवताद्वन्द्वे दीर्घाद्भिर्भ्याभ्यःस्सु ७७ समस्तमेकाक्षरं वृद्ध्या ७८ एकाक्षरमवर्णान्तम् ७९ स्वरलिङ्गस्वरविभक्तिवचनविशेषेषु ८० वर्णलिङ्गस्वरविभक्तिवाक्यव्यत्ययश्छन्दसि ८१ वर्णलोपागमह्रस्वदीर्घप्लुतात्मनेभाषापरस्मैभाषा अपियन्त्यपियन्ति ८२

इति चतुर्थः पादः

इति तृतीयः प्रपाठकश्च
आथर्वणे संहितालक्षणग्रन्थे
प्रातिशाख्यमूलसूत्रं समाप्तम्